# Shri Vighnaraja Stuti Sakshetradevakrita

# સક્ષેત્રાદેવાકૃતા શ્રીવિઘ્નરાજસ્તુતિઃ

## Document Information

Text title : Shri Vighnaraja Stuti Sakshetradevakrita

File name : vighnarAjastutiHsakShetrAdevAkRRitA.itx

Category : ganesha, mudgalapurANa, stuti, ekAdasha

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM ShaShTaH khaNDaH | adhyAyaH 8 | 6.8 16-30||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# સક્ષેત્રાદેવાકૃતા શ્રીવિઘ્નરાજસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

સક્ષેત્રા દેવા ઊચુઃ ।

બ્રહ્મણે વિઘ્નરાજાય સ્વાનન્દસ્થાય તે નમઃ ।

આદિમધ્યાન્તહીનાયાદિમધ્યાન્તસ્વરૂપિણે ॥ ૧૬॥

ગણેશાય નમસ્તુભ્યં ભુક્તિમુક્તિપ્રદાયિને ।

નાનાખેલકરાયૈવ જ્યેષ્ઠરાજાય તે નમઃ ॥ ૧૭॥

સૃષ્ટિકર્ત્રે ચ સંહર્ત્રે પાત્રે મોહપ્રચારિણે ।

ગુણેશાય ગુણાનાં તુ ચાલકાય નમો નમઃ ॥ ૧૮॥

પરેશાય પરેશેભ્યો મોહદાય ગજાનન ।

સર્વયોગમયાયૈવ યોગેશાય નમો નમઃ ॥ ૧૯॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિમયાય ચ ।

સિદ્ધિબુદ્ધિપ્રદાત્રે તે નમશ્ચિન્તામણે નમઃ ॥ ૨૦॥

પૂર્વાઙ્ગે વિષ્ણુરૂપાય દક્ષિણાઙ્ગે શિવાત્મને ।

પશ્ચિમાઙ્ગે ચ માયાયૈ રવયે ઉત્તરાઙ્ગકે ॥ ૨૧॥

ચતુર્વિધં ગણેશાન સૃષ્ટ્વા ખેલસિ નિત્યદા ।

નાનાવિધં તથા ત્વાં તુ કશ્ચ સ્તોતું ક્ષમો ભવેત્ ॥ ૨૨॥

વયં ધન્યા વયં ધન્યા દૃષ્ટવન્તો ગજાનનમ્ ।

બ્રહ્મણસ્પતિનામાનં બ્રહ્મણાં ચાલકં પરમ્ ॥ ૨૩॥

યં સ્તોતું ન સમર્થાશ્ચ વેદાઃ સાઙ્ગા ગજાનન ।

કિં પ્રસ્તુમશ્ચ દેવેશ અતસ્ત્વાં પ્રણમામહે ॥ ૨૪॥

એવં સ્તુત્વા ગણેશાનં દેવાઃ ક્ષેત્રસમન્વિતાઃ ।

પ્રણેમુસ્તં પ્રહર્ષેણ ભક્તિભાવસમન્વિતાઃ ॥ ૨૫॥

તતસ્તાન્ પ્રત્યુવાચેદં વચનં ગણનાયકઃ ।

ભક્તાન્ ભક્તિપ્રિયઃ સાક્ષાત્તપસા તોષિતઃ પરઃ ॥ ૨૬॥

(ફલશ્રુતિઃ)

શ્રીગણેશ ઉવાચ ।
વરં બ્રૂત મહાભાગાઃ સક્ષેત્રા દેવમુખ્યકાઃ ।
દાસ્યામિ તપસા તુષ્ટો ભક્ત્યા સ્તોત્રેણ ચેપ્સિતમ્ ॥ ૨૭॥
સ્તોત્રં ભવત્કૃતં ચૈવ યઃ પઠિષ્યતિ મામકમ્ ।
સ મત્પ્રિયો ભવેદ્દેવાઃ શ‍ૃણુયાચ્છ્રાવયેત્તથા ॥ ૨૮॥
ભુક્તિમુક્તિપ્રદં ચૈવ ધનધાન્યવિવર્ધનમ્ ।
પુત્રપૌત્રપ્રદં પૂર્ણં ભવિષ્યતિ સુસિદ્ધિદમ્ ॥ ૨૯॥
મમ સન્નિધિગો ભૂત્વા પઠતિ સ્તોત્રમુત્તમમ્ ।
સર્વક્ષેત્રભવં પુણ્યં લભતે નાત્ર સંશયઃ ॥ ૩૦॥

ઇતિ સક્ષેત્રાદેવાકૃતા શ્રીવિઘ્નરાજસ્તુતિઃ સમ્પૂર્ણા ॥
એકાદશસ્તોત્રં
- ॥ મુદ્ગલપુરાણં ષષ્ટઃ ખણ્ડઃ । અધ્યાયઃ ૮ । ૬.૮ ૧૬-૩૦॥

- .. mudgalapurANaM ShaShTaH khaNDaH . adhyAyaH 8 . 6.8 16-30..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Vighnaraja Stuti Sakshetradevakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*